## Hiatus in the Interior of Words in the Ṛgveda Saṁhitā (87)

*The following text consisting of 13 sūtras enumerates all words of the Ṛgveda Saṁhitā which contain an internal hiatus (aā, aï, aü, aū, aṛ, ae, āa, āṛ, ea, oa, oṛ, and oo).*

**अथ ऋग्वेदसंहितापदमध्यविवृत्तयः ॥१॥**

atha ṛgvedasaṁhitā-pada-madhya-vivṛttayaḥ

*Now the cases of hiatus (vivṛtti) in the interior of words (pada) of the Ṛgveda-Saṁhitā.*

*Note: Here pada includes compound words in which the parts of the compound are combined by sandhi rules.*

### Hiatus aā (3)

**दूरआदिशं दूरआधीः सुम्नआपिः ॥२॥**

dūraādiśam, dūraādhīḥ, sumnaāpiḥ
dūre-ādiśam, dūre-ādhīḥ, sumne-āpiḥ

1.139.10d जगृभ्मा दूरआदिशं श्लोकमद्रेरध त्मना ।

6.009.06c वि मे मनश्चरति दूरआधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये ॥

10.095.06a या सुजूर्णिः श्रेणिः सुम्नआपिर्ह्रदेचक्षुर्न ग्रन्थिनी चरण्युः ।

### Hiatus aï (5)

**पश्वइष्टिर्वस्यइष्टये ॥३॥**

paśvaïṣṭiḥ, vasyaïṣṭaye (4)
paśvaḥ-iṣṭiḥ, vasyaḥ-iṣṭaye

1.025.04a परा हि मे विमन्यवः पतन्ति वस्यइष्टये ।

1.176.01a मत्सि नो वस्यइष्टय इन्द्रमिन्दो वृषा विश ।

1.180.04c तद्वां नरावश्विना पश्वइष्टी रथ्येव चक्रा प्रति यन्ति मध्वः ॥

8.086.03a युवं हि ष्मा पुरुभुजेममेधतुं विष्णाप्वे ददथुर्वस्यइष्टये ।

8.086.02a कथा नूनं वां विमना उप स्तवद्युवं धियं ददथुर्वस्यइष्टये ।

## Hiatus aü (11)

उक्थउक्थ उषउषस्तितउना दूरउपब्दो नमउक्तिभिर्नमउक्तिं प्रउगं हिरण्यप्रउगम् ॥४॥

ukthaükthe (2), uṣaüṣaḥ, titaünā, dūraüpabdaḥ, namaüktibhiḥ, namaüktim (3), praügam, hiraṇyapraügam
uktha-ukthe, uṣaḥ-uṣaḥ, titaünā, dūre-upabdaḥ, namaükti-bhiḥ, namaḥ-uktim, praügam, hiraṇya-praügam

1.035.05a वि जनाञ्छ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहन्तः ।
1.189.01c युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥
3.014.02a अयामि ते नमउक्तिं जुषस्व ऋतावस्तुभ्यं चेतते सहस्वः ।
5.043.09a प्र तव्यसो नमउक्तिं तुरस्याहं पूष्ण उत वायोरदिक्षि ।
7.021.02c न्यु भ्रियन्ते यशसो गृभादा दूरउपब्दो वृषणो नृषाचः ॥
7.026.02a उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानं सुतासः ।
8.004.06c पुत्रं प्रावर्गं कृणुते सुवीर्ये दाश्नोति नमउक्तिभिः ॥
10.008.04a उषउषो हि वसो अग्रमेषि त्वं यमयोरभवो विभावा ।
10.045.10a आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने ।
10.071.02a सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
10.130.03c छन्दः किमासीत्प्रउगं किमुक्थं यद्देवा देवमयजन्त विश्वे ॥

## Hiatus aū (8)

इतऊतीतऊतिरितऊती सद्यऊतयः ॥५॥

itaūti (3), itaūtiḥ (2), itaūtī, sadyaūtayaḥ (2)
itaḥ-ūti, itaḥ-ūtiḥ, itaūtī itītaḥ-ūtī, sadyaḥ-ūtayaḥ

1.146.02a उक्षा महाँ अभि ववक्ष एने अजरस्तस्थावितऊतिरृष्वः ।

1.151.09a रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति माहिनम् ।

5.054.15a तद्वो यामि द्रविणं सद्यऊतयो येना स्वर्ण ततनाम नॄँरभि ।

7.068.06c अधि यद्वर्प इतऊति धत्थः ॥

9.074.03c ईशे यो वृष्टेरित उस्रियो वृषापां नेता य इतऊतिरृग्मियः ॥

10.031.07c संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरन्त ॥

10.061.02c तूर्वयाणो गूर्तवचस्तमः क्षोदो न रेत इतऊति सिञ्चत् ॥

10.078.02a अग्निर्न ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सद्यऊतयः ।

## Hiatus aṛ (4)

**मनऋङ्गा श्रुतऋषिं सप्तऋषयः सप्तऋषीन् ॥६॥**

manaṛṅgā, śrutaṛṣim, saptaṛṣayaḥ, saptaṛṣīn
manaḥ-ṛṅgā, śruta-ṛṣim, sapta-ṛṣayaḥ, sapta-ṛṣīn

10.047.03c श्रुतऋृषिमुग्रमभिमातिषाहमस्मभ्यं चित्रं वृषणं रयिं दाः ॥

10.082.02c तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋृषीन्पर एकमाहुः ॥

10.106.08c पतरेव चचरा चन्द्रनिर्णिङ्मनऋृङ्गा मनन्या३ न जग्मी ॥

10.109.04a देवा एतस्यामवदन्त पूर्वे सप्तऋृषयस्तपसे ये निषेदुः ।

## Hiatus ae (13)

**एकएकः पुरएता श्रवएषे ॥७॥**

ekaekaḥ (2), puraetā (9), śravaeṣe (2)
ekaḥ-ekaḥ, puraḥ-etā (8), puraetā-iva (1), śravaḥ-eṣe

1.076.02a एह्यग्न इह होता नि षीदादब्धः सु पुरएता भवा नः ।

3.011.05a अदाभ्यः पुरएता विशामग्निर्मानुषीणाम् ।

3.029.15c द्युम्नवद्ब्रह्म कुशिकास एरिर एकएको दमे अग्निं समीधिरे ॥

5.046.01c नास्या वश्मि विमुचं नावृतं पुनर्विद्वान्पथः पुरएत ऋजु नेषति ॥

5.061.01a के ष्ठा नरः श्रेष्ठतमा य एकएक आयय ।

5.066.05a तद्दतं पृथिवि बृहच्छ्रवएष ऋषीणाम् ।

6.021.12a स नो बोधि पुरएता सुगेषूत दुर्गेषु पथिकृद्विदानः ।

6.047.07a इन्द्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ ।

7.033.06c अभवच्च पुरएता वसिष्ठ आदित्तृत्सूनां विशो अप्रथन्त ॥

7.041.05c तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ॥

9.087.03a ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन ।

9.097.29c इन्दो सनित्रं दिव आ पवस्व पुरएतासि महतो धनस्य ॥

## Hiatus āa (1)

**अस्माअस्मै ॥८॥**

asmāasmai
asmai-asmai

6.042.04a अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम् ।

## Hiatus āṛ (4)

**भाऋजीको भाऋजीकम् ॥९॥**

bhāṛjīkaḥ (2), bhāṛjīkam (2)
bhāḥ-ṛjīkaḥ (2), bhāḥ-ṛjīkam (2)

1.044.03c धूमकेतुं भाऋजीकं व्युष्टिषु यज्ञानामध्वरश्रियम् ॥

3.001.12a अक्रो न बभ्रिः समिथे महीनां दिदृक्षेयः सूनवे भाऋजीकः ।

3.001.14a बृहन्त इद्भानवो भाऋजीकमग्निं सचन्त विद्युतो न शुक्राः ।

10.012.02c धूमकेतुः समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान् ॥

## Hiatus ea (6)

आरेअघा आरेअघामारेअवद्यो दूरेअन्ते दूरेअर्थः ॥ १० ॥

āreaghāḥ, āreaghām, āreavadyaḥ, dūreante (2), dūrearthaḥ
āre-aghāḥ, āre-aghām, āre-avadyaḥ, dūreante iti dūre-ante, dūre-arthaḥ

1.185.07a उर्वी पृथ्वी बहुले दूरेअन्ते उप ब्रुवे नमसा यज्ञे अस्मिन् ।

3.054.07a समान्या वियुते दूरेअन्ते ध्रुवे पदे तस्थतुर्जागरूके ।

6.001.12c पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि सन्तु ॥

7.063.04a दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः ।

6.056.06a आ ते स्वस्तिमीमह आरेअघामुपावसुम् ।

10.099.05a स रुद्रेभिरशस्तवार ऋभ्वा हित्वी गयमारेअवद्य आगात् ।

## Hiatus oa (28)

अधोअक्षाः खादोअर्णा गोअग्रया गोअग्रा गोअग्रान् गोअग्रां गोअजनासो गोअर्णसो गोअर्णसं गोअर्णसा गोअर्णसि तिरोअह्न्यं पीवोअन्नान् पीवोअश्वा मिथोअवद्यपेभिः सद्योअर्थम् ॥ ११ ॥

adhoakṣāḥ, khādoarṇāḥ, goagrayā (2), goagrāḥ (3), goagrān, goagrām (2), goajanāsaḥ, goarṇasaḥ, goarṇasam, goarṇasā, goarṇasi, tiroahnyam (9), pīvoannān, pīvoaśvāḥ, mithoavadyapebhiḥ, sadyoartham

adhaḥ-akṣāḥ, khādaḥ-arṇāḥ, go-agrayā, go-agrāḥ, go-agrān, go-agrām, go-ajanāsaḥ, go-arṇasaḥ, go-arṇasam, go-arṇasā, go-arṇasi, tiraḥ-ahnyam, pīvaḥ-annān, pīvaḥ-aśvāḥ, mithaḥ-avadyapebhiḥ, sadyaḥ-artham

1.045.10c अयं सोमः सुदानवस्तं पात तिरोअह्न्यम् ॥

1.047.01c तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥

1.053.05c सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ॥

1.060.01a वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थम् ।

1.090.05a उत नो धियो गोअग्राः पूषन्विष्णवेवयावः ।

1.092.07c प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्राँ उप मासि वाजान् ॥

1.112.18a याभिरङ्गिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः ।

1.169.08a त्वं मानेभ्य इन्द्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः ।

2.001.16a ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।

2.002.13a ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।

2.034.12c उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा ॥

3.028.03a अग्ने वीहि पुरोळाशमाहुतं तिरोअह्न्यम् ।

3.028.06c जुषस्व तिरोअह्न्यम् ॥

3.033.09c नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः ॥

3.058.07c नासत्या तिरोअह्न्यं जुषाणा सोमं पिबतमस्रिधा सुदानू ॥

4.037.04a पीवोअश्वाः शुचद्रथा हि भूतायःशिप्रा वाजिनः सुनिष्काः ।

5.045.02c धन्वर्णसो नद्य१ः खादोअर्णा स्थूणेव सुमिता दृंहत द्यौः ॥

6.039.01c अपा नस्तस्य सचनस्य देवेषो युवस्व गृणते गोअग्राः ॥

7.033.06a दण्डा इवेद्गोअजनास आसन्परिच्छिन्ना भरता अर्भकासः ।

7.091.03a पीवोअन्नाँ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।

8.035.19c सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥

8.035.20c सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥

8.035.21c सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥

9.071.08c अप्सा याति स्वधया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया ॥

10.038.02a स नः क्षुमन्तं सदने व्यूर्णुहि गोअर्णसं रयिमिन्द्र श्रवाय्यम् ।

10.067.08c बृहस्पतिर्मिथोअवद्यपेभिरुदुस्रिया असृजत स्वयुग्भिः ॥

10.076.03c गोअर्णसि त्वाष्ट्रे अश्वनिर्णिजि प्रेमध्वरेष्वध्वराँ अशिश्रयुः ॥

10.099.06c अस्य त्रितो न्वोजसा वृधानो विपा वराहमयोअग्रया हन् ॥

## Hiatus oṛ (3)

**गोऋजीकं गोऋजीका ॥१२॥**

goṛjīkam (2), goṛjīkā
go-ṛjīkam, go-ṛjīkā

3.058.04c इमा हि वां गोऋजीका मधूनि प्र मित्रासो न ददुरुस्रो अग्रे ॥

6.023.07a स नो बोधि पुरोळाशं रराणः पिबा तु सोमं गोऋजीकमिन्द्र ।

7.021.01a असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।

## Hiatus oo (1)

**गोओपशा ॥१३ ॥**

goopaśā
go-opaśā

6.053.09a या ते अष्ट्रा गोओपशाघृणे पशुसाधनी ।

## Appendix 1: Hiatus - RV-Prātiśākhya

apratyāmnāye padavac ca padyān ||1.61||
*In the absence of a statement to the contrary, (one should treat) the parts of a compound as words.*

saṁhitā padaprakṛtiḥ ||2.1 ||

*Saṁhitā has the words (pada) as its source (prakṛti).*

padāntān padādibhiḥ saṁdadhadeti yatsā kālāvyavāyena ||2.2 ||
*(It is called Samhitā) because, while combining the finals to the initials of words, it proceeds without any interval of time (pause).*

svarāntaraṁ tu vivṛttiḥ ||2.3 ||
*The interval, however, between two vowels, is called hiatus (vivṛtti).*

sā vā svarabhaktikālā ||2.4 ||
*That (hiatus) has optionally the duration of a 'vowel-part' (svarabhakti).*

puraetā titaünā praügaṁ namaüktibhiḥ | antaḥpadaṁ vivṛttayaḥ ||2.13 ||
*Puraetā, titaünā, praügam and namaüktibhiḥ - (these) are (the four cases of ) hiatus in the interior of words.*

Note: In the case of compounds antaḥpadam refers to the interior of the parts of the compound (see 1.61): puraetā-iva (6.47.7); hiraṇya-praügam (1.35.5); namaükti-bhiḥ (8.4.6)

ato 'nyāḥ padasaṁdhiṣu ||2.14 ||
*Cases of hiatus, other than these, (occur) in the (external) combinations of words.*

yato dīrghas tato dīrghā vivṛttayaḥ ||2.79||
*Where there is (at least) a long vowel the hiatuses are long.*

dviṣaṁdhayas tūbhayataḥ svarasvarāḥ ||2.80||
*Those hiatuses, in which there is an vowel on both sides of an (intermediate) vowel, are technically called dvi-ṣaṁdhis.*

prācyapañcāla upadhānibhodayāḥ śākalyasya sthavirasya ||2.81||
*According to the old Śākalya (the hiatuses) in the Prācya and Pañcāla (Padavṛttis) have their following vowels resembling their preceding ones.*

itaro sthitiḥ ||2.82||
*(But) the settled practice is otherwise.*

## Appendix 2: Hiatus - Śaiśirīyaśikṣā

ākāśasthā yathā vidyutsphaṭike maṇisūtravat |
eṣa chedo vivṛttīnāṁ yathāmātravicakṣaṇaḥ ||

vatsānusṛtārdhamātrā tathā vatsānusāriṇī |
pākavaty ubhayor hrasvā dīrghamadhyā pipīlikā ||

pra va eko 'rvāñco adyarathaṁ hiraṇyapraügam |
dhṛtavratā ādityāś caitat tatra nidarśanam ||

*pra | vaḥ | ekaḥ | => pra va ekaḥ  (2.29.5)  (vatsānusṛtā)*
*arvāñcaḥ | adya | => arvāñco adya (2.29.6) (vatsānusāriṇī)*
*ratham | hiraṇya-praügam | => rathaṁ hiraṇyapraügam (1.35.5) (pākavatī)*
*dhṛta-vratāḥ | ādityāḥ | => dhṛtavratā ādityāḥ (2.29.1) (pipīlikā)*

*Four kinds of hiatus: vatsānusṛtā (½ mātrā) , vatsānusāriṇī (½), pākavatī (½),  pipīlikā (½).*

*vatsānusṛtā: a ā, aā, a ī, a ū, aū, a e, ae, a ai, a o, a au, u ā, u ī, u ū, u e; vatsānusāriṇī: ā a, āa, ā i, ā u, ā ṛ, āṛ, ī a, ī i, ī u, ī ṛ, ū a, ū i, ū u, ū ṛ, e a, ea, e i, e u, e ṛ, o a, oa, oṛ, o i, o u;  pākavatī: a a, a i, aï, a u, aü, aṛ, a ṛ, u a; pipīlikā: ā ā, ā ī, ā ū, ā e, ā ai, ā o, ī ā, ī e, ī o, ū ā, ū au, e ā, e ū, e e, e o, o ā, o ū, o e, oo*

## Final Notes / References

1. Total cases of hiatus in the interior of words: 87.

2. Hiatus ai and au are shown as aï and aü.

3. Ṛgveda-Saṁhitā and Padapāṭha:
   http://www.detlef108.de/Rigveda.htm

4. Ṛgveda- Prātiśākhya:
   https://sites.google.com/view/rv-pratishakhya
   The Rgveda Pratisakhya Vol III (1937/00/00) - English translation

5. Śaiśirīyaśikṣā:
   http://peterffreund.com/shiksha/shaishiriya_shiksha.html

6. Śikṣās and Vedalakṣaṇa texts:
   Aithal, K.Parameswara, Veda-Lakṣaṇa: Vedic Ancillary Literature: A Descriptive Bibliography, Motilal Banarsidass: Delhi, 1993
   http://vedicreserve.mum.edu/shiksha/shiksha_vedicreserve.html
   https://sites.google.com/view/vedalakshana
   https://sites.google.com/view/vedalakshana/links

7. Last update by Detlef Eichler  29 January 2021